# ॐ श्रीपरमात्मने नमः

# श्रीमद्भगवद्गीता

## ॥ अथ श्रीगीतामाहात्म्यप्रारम्भः ॥

### धरोवाच

भगवन् परमेशान    भक्तिरव्यभिचारिणी।
प्रारब्धं भुज्यमानस्य    कथं भवति हे प्रभो॥ १

### श्रीविष्णुरुवाच

प्रारब्धं भुज्यमानो हि    गीताभ्यासरतः सदा।
स मुक्तः स सुखी लोके    कर्मणा नोपलिप्यते॥ २

महापापादिपापानि    गीताध्यानं करोति चेत्।
क्वचित्स्पर्शं न कुर्वन्ति    नलिनीदलमम्बुवत्॥ ३

गीतायाः पुस्तकं यत्र    यत्र पाठः प्रवर्तते।
तत्र सर्वाणि तीर्थानि    प्रयागादीनि तत्र वै॥ ४

सर्वे देवाश्च ऋषयः    योगिनः पन्नगाश्च ये।
गोपाला गोपिका वापि    नारदोद्धवपार्षदैः।
सहायो जायते शीघ्रं    यत्र गीता प्रवर्तते॥ ५

यत्र गीताविचारश्च    पठनं पाठनं श्रुतम्।
तत्राहं निश्चितं पृथ्वि    निवसामि सदैव हि॥ ६

गीताश्रयेऽहं तिष्ठामि गीता मे चोत्तमं गृहम्।
गीताज्ञानमुपाश्रित्य त्रींल्लोकान्पालयाम्यहम्॥ ७

गीता मे परमा विद्या ब्रह्मरूपा न संशयः।
अर्धमात्राक्षरा नित्या स्वानिर्वाच्यपदात्मिका॥ ८

चिदानन्देन कृष्णेन प्रोक्ता स्वमुखतोऽर्जुनम्।
वेदत्रयी परानन्दा तत्त्वार्थज्ञानसंयुता॥ ९

योऽष्टादशं जपेन्नित्यं नरो निश्चलमानसः।
ज्ञानसिद्धिं स लभते ततो याति परं पदम्॥ १०

पाठेऽसमर्थः सम्पूर्णे ततोऽर्धं पाठमाचरेत्।
तदा गोदानजं पुण्यं लभते नात्र संशयः॥ ११

त्रिभागं पठमानस्तु गङ्गास्नानफलं लभेत्।
षडंशं जपमानस्तु सोमयागफलं लभेत्॥ १२

एकाध्यायं तु यो नित्यं पठते भक्तिसंयुतः।
रुद्रलोकमवाप्नोति गणो भूत्वा वसेच्चिरम्॥ १३

अध्यायं श्लोकपादं वा नित्यं यः पठते नरः।
स याति नरतां यावत् मन्वन्तरं वसुन्धरे॥ १४

गीतायाः श्लोकदशकं सप्त पञ्च चतुष्टयम्।
द्वौ त्रीनेकं तदर्धं वा श्लोकानां यः पठेन्नरः॥ १५

चन्द्रलोकमवाप्नोति वर्षाणामयुतं ध्रुवम्।
गीतापाठसमायुक्तः मृतो मानुषतां व्रजेत्॥ १६

गीताभ्यासं पुनः कृत्वा लभते मुक्तिमुत्तमाम्।
गीतेत्युच्चारसंयुक्तः म्रियमाणो गतिं लभेत्॥ १७

गीतार्थश्रवणासक्तः महापापयुतोऽपि वा।
वैकुण्ठं समवाप्नोति विष्णुना सह मोदते॥ १८

गीतार्थं ध्यायते नित्यं कृत्वा कर्माणि भूरिशः।
जीवन्मुक्तः स विज्ञेयः देहान्ते परमं पदम्॥ १९

गीतामाश्रित्य बहवः भूभुजो जनकादयः।
निर्धूतकल्मषा लोके गीता याताः परं पदम्॥ २०

गीतायाः पठनं कृत्वा माहात्म्यं नैव यः पठेत्।
वृथा पाठो भवेत्तस्य श्रम एव ह्युदाहृतः॥ २१

एतन्माहात्म्यसंयुक्तं गीताभ्यासं करोति यः।
स तत्फलमवाप्नोति दुर्लभां गतिमाप्नुयात्॥ २२

**सूत उवाच**

माहात्म्यमेतद्गीताया मया प्रोक्तं सनातनम्।
गीतान्ते च पठेद्यस्तु यदुक्तं तत्फलं लभेत्॥ २३

*॥ इति वाराहपुराणे श्रीगीतामाहात्म्यं सम्पूर्णम्॥*

## ॥ अथ द्वितीयमाहात्म्यम् ॥

गीताशास्त्रमिदं पुण्यं यः पठेत्प्रयतः पुमान्।
विष्णोः पदमवाप्नोति भयशोकादिवर्जितः॥ १

गीताध्ययनशीलस्य प्राणायामपरस्य च।
नैव सन्ति हि पापानि पूर्वजन्मकृतानि च॥ २

मलनिर्मोचनं पुंसां जलस्नानं दिने दिने।
सकृद्गीताम्भसि स्नानं संसारमलनाशनम्॥ ३

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता॥ ४

भारतामृतसर्वस्वं विष्णोर्वक्त्राद्विनिःसृतम्।
गीतागङ्गोदकं पीत्वा पुनर्जन्म न विद्यते॥ ५

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥ ६

एकं शास्त्रं देवकीपुत्रगीतम् एको देवो देवकीपुत्र एव।
एको मन्त्रस्तस्य नामानि यानि कर्माप्येकं तस्य देवस्य सेवा॥ ७